## द्वितीयः पाठः

# वत्सराजनिग्रहः

*[ वीर रस से ओतप्रोत, उत्तेजना को बढ़ानेवाला, उमंग-वर्धक **वत्सराजनिग्रहः** नामक शीर्षक, संस्कृत नाट्य-शास्त्र में मूर्धन्य स्थान प्राप्त महाकवि **भास** द्वारा रचित 'प्रतिज्ञा यौगन्धरायण' नाटक के प्रथम अंक से लिया गया है। इसमें उज्जयिनी के राजा **चण्डप्रद्योत** द्वारा कौशाम्बी के राजा **वत्सराज उदयन** का कपटपूर्वक अपहरण कर लिया जाता है जिसे सुनकर उनका मन्त्री यौगन्धरायण आवेशित होकर उन्हें छुड़ाने की प्रचण्ड शपथ ग्रहण करता है और कहता है कि यदि शत्रु चन्द्रमा को ग्रसनेवाले राहु की भाँति भी होगा तो भी मैं राजा को अवश्य ही बन्धन-मुक्त कराऊँगा। ]*

**[ततः प्रविशति यौगन्धरायणः सालकेन सह]**

**यौगन्धरायणः** – सालक! सज्जस्त्वम्?

**सालकः** – आर्य! अथ किम्।

**यौगन्धरायणः** – महान् खल्वध्वा गन्तव्यः।

**सालकः** – महत्तरेण स्नेहेन आर्यमुपतिष्ठे।

**यौगन्धरायणः** – हन्त! यास्यति बलवान् यस्य सौहार्दम्। अथ वेणुवनाश्रितेषु गहनेषु नागवनं श्वः प्रयाता स्वामी वत्सराजः प्रागेव सम्भावयितव्यः।

**सालकः** – आर्य! लेखः खलु मामपवहति, यस्मिन्नायत्तकार्यशरीरम्।

**यौगन्धरायणः** – विजये!

**[प्रविश्य]**

**विजया** – आर्य! इयमस्मि।

**यौगन्धरायणः** – विजये! त्वर्यतां लेखः प्रतिसरा च।

**विजया** – आर्य! तथा। (निष्क्रान्ता)

**यौगन्धरायणः** – अथ दृष्टपूर्वस्त्वयैष पन्थाः।

**सालकः** – नहि, श्रुतपूर्वः।

**यौगन्धरायणः** – एतदपि मेधाविलक्षणम्। भोः! वनगजप्रच्छादितशरीरं नीलहस्तिनं उपन्यस्य प्रद्योतः स्वामिनं छलयितुकाम इति प्रवृत्तिरुपगता नः। अपीदानीं स्वामिनो बुद्यतिक्रमो न स्यात्। अहो नु खलु वत्सराजभीरुत्वं प्रद्योतस्य। व्यक्तीकृतमसामर्थ्यमक्षौहिण्याः।

**[प्रविश्य]**

**विजया** – लेखः खल्वयम्, प्रतिसरावधूजनहस्तात् त्वर्यत् इति भर्तृमाता आह।

**यौगन्धरायणः** – विजये! विज्ञाप्यतां तत्रभवत्यै, सर्ववधूजनहस्तयुक्ता वा एका वा प्रतिसरा दीयतामिति।

**विजया** – आर्य! तथा। (निष्क्रान्ता)

**[प्रविश्य]**

**निर्मुण्डकः** – सुखमार्यस्य। आर्य एष भर्तृपादमूलादौपस्थिको हंसकः आगतः।

**यौगन्धरायणः** – कथं हंसकः एकः प्राप्तः इति? सालक! विश्राम्यतामिदानीं त्वरिततरं वा यास्यसि सविश्रमो वा।

**सालकः** – आर्य! तथा (इति निष्क्रान्तः)

**यौगन्धरायणः** – निर्मुण्डक! प्रवेश्यतां हंसकः।

**(ततः प्रविशति हंसकः निर्मुण्डकश्च)**

**निर्मुण्डकः** – आर्य तथा।

**हंसकः** – कुत्र–कुत्र? आर्यः।

**निर्मुण्डकः** – एष आर्यस्तिष्ठति उपसर्पत्वैनम्। (निष्क्रान्तः)

**हंसकः** – (*उपसृत्य*) सुखमार्यस्य?

**यौगन्धरायणः** – हंसक! न खलुगतः स्वामी नागवनम्?

**हंसकः** – आर्य! ह्य एव गतो भर्त्ता।

**यौगन्धरायणः** – हन्त! निष्फलमनुप्रेषणम्। छलिताः स्म। अथास्ति प्रत्याशा, अथवा अद्यैव प्राणाः मोक्तव्याः।

**हंसकः** – धरते खलु तावद् भर्त्ता।

**यौगन्धरायणः** – धरते तावदित्यनूर्जिता विपत्तिरभिहता। गृहीतेन स्वामिना भवितव्यं ननु। कथं गृहीतः? हन्त! भोः महान् खलु भारः प्रद्योतस्य भाग्यैर्निस्तीर्णः। इदानीं रुमण्वान् क्व गतः? इदानीमश्वारोहणीयं क्व गतम्?

**हंसकः** – यदि समग्रयोधबलपरिवारो भवेद् भर्त्ता, नैष दोषो भवेत्।

**यौगन्धरायणः** – कथमसमग्रयोधबलपरिवारो नाम स्वामी?

**हंसकः** – शृणोत्वार्यः। सावशेषप्रत्यूषायां रजन्यां बालुकातीर्थेन नर्मदां तीर्त्वा, छत्रमात्रपरिच्छदेन, गजयूथविमर्दयोग्येनबलेन वीथ्या नागवनं प्रयातो भर्त्ता।

**यौगन्धरायणः** – ततस्ततः।

**हंसकः** – तदा योजनानि गत्वा विषमदर्शनं दृष्टं नागयूथं, तस्मिन् यूथे अस्यानर्थ-स्योत्पादकः कश्चिन्पदातिः भर्त्तारमुपस्थितः।

**यौगन्धरायणः** – तिष्ठ! इतः क्रोशमात्रे मल्लिकासालप्रच्छादितशरीरः नखदन्तवर्जमेकनीलो हस्ती मयादृश्यत इत्युक्तवान् ननु?

**हंसकः** – कथं परिज्ञातं खल्वेतदार्येण? जाग्रति खलु समुत्पन्नोऽयंदोषः।

**यौगन्धरायणः** – हंसक! जाग्रतोऽपि बलवत्तरः कृतान्तः। ततस्ततः।

**हंसकः** – ततः सुवर्णशतप्रदानेन नृशंसं प्रतिपूज्य भर्त्रोक्तम्–अस्त्येष चक्रवर्ती हस्ती नीलकुवलयतनुर्नाम हस्तिशिक्षायां पठितः। गजं तमहं वीणा–द्वितीयमानयामीति। ततः नीलबलाहकात् हस्तिनोऽवतीर्य सुन्दरपाटलं नाम अश्वमारुह्य विंशतिमात्रिभिः सह पदातिभिः प्रयातो भर्त्ता। ततोद्विगुणमध्वानं गत्वा सालवृक्षच्छायां धनुः शतमात्रेणैव दृष्टः सः दिव्यवारणप्रतिच्छन्दः। ततो भर्त्तावतीर्याश्वाद् देवतानां प्रणामं कृत्वा गृहीता वीणा। ततः महान् कण्ठीरवः पृष्ठतः समुत्पन्नः।

**यौगन्धरायणः** – ततस्ततः।

**हंसकः** – तदा कण्ठीरवपरिज्ञाननिमित्तं परिवृत्ताश्च वयम्। महामात्रोत्तरायुधीयाधिष्ठितः प्रत्युद्गतः सः कृतकहस्ती। ततो भर्त्ता प्रविष्टः एव तत्परबलम्।

**यौगन्धरायणः** – प्रविष्ट इति? अथवा ननु स्थाने–

**व्रीलितो वञ्चनां प्राप्य मानी सत्वमुपाश्रितः।**
**शूरश्चैकायनस्थश्च किमन्यत् प्रतिपद्यते।।**

ततस्ततः।

**हंसकः** – तदा अनुबद्धदिवसयुद्धपरिश्रान्तः, बहुप्रहारनिपतिततुरगः मोहं गतो भर्त्ता। ततः यथाशक्तिसन्निहितगहनोत्पाटिताभिः कर्कशाभिः लताभिः शरीरयन्त्रणात् प्रधर्षितो भर्त्ता।

**यौगन्धरायणः** – अथ कस्यां वेलायां प्रत्यागतप्राणः स्वामी?

**हंसकः** – आर्य! अवसितावलेपेषु पापेषु।

**यौगन्धरायणः** – दिष्ट्या शरीरं धर्षितं न तेजः।

**हंसकः** – ततः प्रत्यागतप्राणमिदानीं भर्त्तारं प्रेक्ष्य सर्वतोऽभिद्रुतास्तेपापाः। तत्रैको व्यवसितोऽकार्यं कर्तुम्। स दक्षिणाभिमुखं परिवर्त्यभर्त्तारं करवालप्रहारवेगमुत्पादयितुकामः अधावत्।

**यौगन्धरायणः** – हंसकः! वृत्तान्तं तावदाधारय।

**हंसकः** – तदा रुधिरपाटलपिच्छिलायां भूमौ स्वेन वेगेन स नृशंसो पतितः। तदा शालङ्कायनो नाम प्रद्योतस्य अमात्यः मा खलु-मा खलु साहसं इति भणित्वा तं देशमुपस्थितः। प्रणामं कृत्वा शरीरयन्त्रणात् तेन मोचितो भर्त्ता।

**यौगन्धरायणः** – विमुक्तः स्वामी, साधु भोः। शालङ्कायन साधु। अवस्था खलु नाम शत्रुमपि सुहृत्वे कल्पयति। अथ किं प्रतिपन्नं तेन साधुना?

**हंसकः** – ततस्तेनार्येणानेकं सोपचारं शान्तिवचनं भणित्वा स्कन्धशयनमा-रोप्योज्जयिनीमेव नीतो भर्त्ता।

**[प्रविश्य]**

**विजया** – आर्य एषा प्रतिसरा।

**यौगन्धरायणः** – विजये स्थाप्यताम्।

**प्रतीहारी** – किमिति भर्तृमातरं निवेदयामि?

**यौगन्धरायणः** – विजये! न खलु त्वयात्रभवत्यै 'गृहीतः स्वामी' इति सहसा निवेदयितव्यम्। स्नेहदुर्बलं मातृहृदयं रक्ष्यम्।

**यौगन्धरायणः** – हंसक! त्वमिदानीं स्वामिना सह किं न गतः।

**हंसकः** – आर्य! शालङ्कायनेन नियुक्तः गच्छेमं वृत्तान्तं कौशाम्ब्यां निवेदय इति।

**यौगन्धरायणः** – अथ मामन्तरेण न स्वामी किञ्चिदाह।

**हंसकः** – आर्य! सन्देष्टुकामेनेवास्मि भर्त्रोक्तः।

**यौगन्धरायणः** – **यदि शत्रुबलग्रस्तो राहुणा चन्द्रमा इव।**
**मोचयामि न राजानं नास्मि यौगन्धरायणः।।**

# काठिन्य निवारण

**उपतिष्ठे** = सेवा करता हूँ। **आयत्तं** = अधीन। **प्रतिसरा** = रक्षा सूत्र। **अनुप्रेषणम्** = भेजना। **छलिताः** = छले गये। **प्रत्याशा** = आशा। **अनूर्जिता** = छोटी विपत्ति। **निस्तीर्ण** = पूर्ण हो गया। **अश्वारोहणीयं** = घुड़सवार सेना। **साविग्नं** = दुःखी। **सोपचारं** = उपचारयुक्त वचन। **सावशेषप्रत्यूषायाम्** = थोड़ी रात शेष रह जाने पर। **वीथ्या** = पगडण्डी से। **विषमदर्शनं** = भयंकर। **नागयूथं** = हाथियों का झुण्ड। **नखदन्तवर्जम्** = नाखून एवं दाँतों से रहित। **मल्लिकासालप्रच्छादितशरीरः** = मल्लिका तथा साल वृक्षों से ढका हुआ शरीरवाला। **कण्ठीरवः** = सिंह। **परिज्ञानं** = पहचान। **व्रीलित** = लज्जित। **पिच्छिलायां** = कीचड़ से भरी हुई। **अध्वा** = मार्ग। **स्कन्धशयनं** = पालकी। **नीतो** = लाया। **भर्त्ता** = राजा।

# अभ्यास-प्रश्न

१. निम्नलिखित प्रश्नों के उत्तर संस्कृत में दीजिए–
   (क) यौगन्धरायण: क: आसीत्?
   (ख) प्रतिसराया: किं महत्त्वं?
   (ग) राजा उदयन: नीलहस्तिनं वशीकर्तुं कुत्र गत:? तत्र किं दृष्टम्?
   (घ) तेन का नदी तीर्णा?
   (ङ) कतिभि: पदातिभि: सह राजा प्रयात:?
   (च) कृतकहस्ती इति तेन कथं ज्ञातम्?
   (छ) राजा कथं मोहं गत:?
   (ज) केन विमुक्त: राजा?
   (झ) अमात्यस्य का प्रतिज्ञा आसीत्?
   (ञ) राजा कुत्रानीत:?
२. पाठ के आधार पर राजा उदयन का चरित्र-चित्रण कीजिए।
३. 'वत्सराजनिग्रह:' पाठ के आधार पर यौगन्धरायण का चरित्र-चित्रण कीजिए।

# वस्तुनिष्ठ-प्रश्न

**निम्न प्रश्नों के सही विकल्प लिखिए–**

१. उदयन: क: आसीत्–
   (क) प्रतिज्ञा यौगन्धरायणम् नाटकस्य रचनाकार: आसीत्
   (ख) कौशाम्बी-नरेश: आसीत्
   (ग) चण्डप्रद्योतस्य मित्र: आसीत्
   (घ) सालकस्य शत्रु: आसीत्
२. तेन का नदी तीर्णा–
   (क) यमुना नदी (ख) सिन्धु नदी
   (ग) नर्मदा नदी (घ) गंगा नदी
३. "<u>मोचयामि</u> न राजानं नास्मि यौगन्धरायण:।" रेखांकित शब्द है–
   (क) अन्य पुरुष में (ख) मध्यम पुरुष में
   (ग) उत्तम पुरुष में (घ) किसी में नहीं
४. सही विकल्प का चयन कर रिक्त स्थान की पूर्ति कीजिए–
   ..........................पदातिभि: सह राजा प्रयात:।
   (क) सप्तविंशतिमात्रै:, (ख) विंशतिमात्रिभि:
   (ग) सप्तदशमात्रिभि: (घ) त्रिंशत्मात्रिभि:

## ➡ आन्तरिक मूल्यांकन

अपने राजा के लिए समर्पित यौगन्धरायण जैसे मन्त्री के बारे में आप क्या जानते हैं? उनके बारे में लिखिए।

●●●